- Title – – ~~नव्य न्याय सम्बन्धित~~ अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 17 / 34 पृष्ठ
- Lines-
- Size –
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – – स्वव्यधिकरणत्वा- प्रविष्टस्तथापि हेतुतावच्छेदकधर्म-
- End – स्वाश्रयाधिकरणीभूतयन्निष्ठाधिकरण प्रतीतिः संयोगाभावनिष्ठस्य संयोगसमाना- धिकरणस्य अवच्छेदकत्वाभाव —— ।
- Colophon-
- Illustrations -
- Source -
- Subject - —— नव्य न्याय सम्बन्धित
- Revisor -
- Author - अज्ञात
- Remarks- अपूर्ण, 1/2/3/10/20/24 नम्बर पेज उपलब्ध नहीं हैं,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्योति प्रकाश

सध्या

~~क्षीर भोई~~

क्वीर भोई

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि॰ ल॰
४

त्वियद्वच्छिन्नाधिकरणत्वाप्रसिद्धेस्तथापि हेतुतावच्छेदकधर्मस्याप्रयाधिकरणी
भूतयन्निष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोर्व्य
तिरेकस्तथाविधं हेतुतावच्छेदकस्याप्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधि
करणेत्यनेन न क्विचिद्दितं वह्निमान्धूमादित्यादौ चर्त्तदृशं हेत्वधिकरणं धूमस्या
धिकरणमात्रं द्रव्यंविशिष्टसत्वादित्यादौ तु तादृशं हेत्वधिकरणं द्रव्यमेव न तु
गुणादि विशिष्टसत्ताविनन्निष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणताव
च्छेदकत्वस्य च द्वयोः सत्वादिति चेयं साध्यसाधनभेदेन व्याप्तेर्भेदात्तथात्रहेतुतावच्छेद
कं नाधिकरणतावच्छेदकं तत्रान्न दाप्रयसमानाधिकरणत्वमेव व्याप्तिवेश्यमित्यपि वदंतिन
सामानाधिकरण्यस्य व्याप्तित्वेन स्व
प

(1)

४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रणेऽइत्यादऽइत्यादिन्यायस्यपत्नीयहेतौतथाचव्यापः पद्मान्निर्देशंविनानासंभवात्
तोऽइदंपदेनतन्निर्देशः एवमग्रेपियत्र द्रव्येधर्मिणितादात्म्येनगुणकर्मणोः 2
साध्यताम्रमंनिरसितुमिदमितिपद्मानिर्देशइतितन्मंदंएवमपिइदंत्वविशि
ष्टद्रव्येगुणकर्मणोः साध्यताम्रमस्यानिरासादितिगुणादाववृतेरितिगुणादा
वभावादित्यर्थः तथाचहेतुतावच्छेकावच्छिन्नाधिकरणत्वेनगुणस्येति
पपघ्यवश्यपल्लप्राप्तेः पर्वतत्वचत्वरत्वादिततद्धर्मविशिष्टधूमत्वाद्यव
च्छिन्नाधिकरणताव्याप्तिशिरेवधूमवन्नितिप्रतीत्युपपत्तेर्धूमत्वाद्यवच्छिन्नाधि
करणतायांमानाभावाद्वह्निमान्धूमादित्यादावव्याप्तिर्हेतुतावच्छेदकीभूतधूम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि. ल.

राम
५

अपक्षत्वेनैव परामर्शस्य धूमादिलिंगकानुमितिहेतुत्वादुक्तव्याप्तेरासमादिसाधार
ण्येपि न क्षतिरिति वाच्यं पक्षधर्मताविशेषविषयतयानुमितिजनकतावच्छेदकस्यै
व व्याप्तिपदार्थतया धूमत्वादेस्तत्वानिवेशेन तद्घटितस्यैव व्याप्तित्वादिति भा
वः धूमत्वादिमतीतिति प्राचीनस्येति मूलस्यं तत्त्वं दलद्वयेलक्षणे चोभयपक्षेवावित्त
मितिभावः ननु साधननिष्ठसामानाधिकरण्यस्य व्याप्तित्वे विशिष्टसत्वव्यापकीभूत
द्रव्यत्वसामानाधिकरण्यवतः सत्वस्य गुणादौ परामर्शात् गुणोपि द्रव्यत्वानुमितिः
स्यादत आह तद्वतीति तादृशसामानाधिकरण्यवतीत्यर्थः तथा च तादृशसा
मानाधिकरण्यविशिष्टधूमत्वं व्याप्तिस्तं कारिकैव पक्षधर्मताधीरनुमितिहे

त्म

3

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तिधूमंगिन्नत्वा धूमसामान्ये वह्निसामान्यस्य व्याप्तिरिति व्यवहारोनुपपन्न ५
इत्यत आह तत्सामानाधिकरण्येति तथा च वह्नित्व धूमत्वावच्छिन्नगसादेवत्तन्व्या
प्तेरैक्यव्यवहारो ननु वस्तुगत्या व्याप्तेरैक्यमिति भावः नन्वेवं महानसीयवह्नि
सामानाधिकरण्यस्य सत्त्वात्तस्य पक्षवृत्तिधूमादावसत्त्वात्पर्वतीयवह्निसामा
नाधिकरण्यस्य प्रागनवगमात्कुतः परामर्श इत्याशंकायामैकैव वह्निसा
व्याप्तिरिति परामर्शोपपत्तिः तत्र योऽसंगतत्वं इत्यत आह वस्तुतस्त्विति रासभमेणी
ति तथा च धूमव्यापकवह्निसमानाधिकरणो रासभवान्पर्वत इति ज्ञानादप्य
नुमितिः स्यादिति भावः न च धूमनादि व्यापकवह्निसमानाधिकरणधूमादिति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि॰ द्द

हेन समानाधिकरणस्यैव हेत्वधिकरणेति स्वावच्छिन्नवृत्तिमत्त्वरूपस्यानिवेशादु
क्त्वाव्याप्तिवृत्त्यसंभवात् प्रतियोगिवैयधिकरण्यविशेषणप्रवेशो मूलक
तामनुचितमिति वाच्यं अग्रे समाधास्यमानत्वादिति भावः तत्र समानाधिक अ
पवाव रणं तेननुशाखावमूलादि सर्वावच्छेदेन सर्वत्र द्रव्ये गगनादिसंयोगसत्त्वात्कु
त्रस्त्र सामान्याभावस्य द्रव्ये संभव इत्यत आह संयोगस्येति वृक्षे शाखाद्य
वच्छेदेन तत्तत्संयोगसत्त्वेपि वृक्षत्वावच्छेदेन कस्याश्चिदपि संयोगव्यक्तेर राम
सत्त्वात्तदवच्छेदेनैव संयोगसामान्याभावसंभवः अवच्छेदकभेदेनैक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदप्यायनीलघटत्वप्रकारकबुद्धौ घटत्वस्यैव स्वरूपतन एव धूमत्वस्य भानेन तद्धू विशेष
मत्वेन ज्ञाने गौरवमिति भावः आद्येति तत्पाद्येतामुद्यादायैव पर्वतीयवह्निधूमयो
रसंनिकर्षात्तयोः कथं व्याप्तिग्रह इतिपरामर्शीयः पूर्वपक्ष इति भावः द्वितीयेति
तत्पाक्षैतामाम प्रत्यैवत्र एकैवहि साव्याप्तिरितिपरामर्शीयः पूर्वपक्ष ग्रंथ इतिभा
वः यद्वैकमेव साध्याधिकरणं तत्रैव हेतु यवान एतत्प्रसादित्यादौ आद्याप्पाभि
नैव यत्रच द्रव्यत्वादौ साध्ये सत्वव्याप्यजातिमतो हेतुत्वेन त्रद्धेतुताछेदकी
भूतानां नीलत्वादि जातीनां नानात्वेन द्वितीयापिक्षच्चिद्भिन्नैवेति न मन्तव्यं कपिसं
योगित्येतत्पदार्थस्य साध्यव्यभिचारत्वं इ नाप्तिमयमिति पक्ष निर्देशः नचाभावे
ना

क्षि॰ ल॰

पत्त्वं वंधाव छिन्न

सतत्त्वात्ववछिन्नतत्त्वं वं भावाछिन्नप्रतियोगिताकाभावादि ४

१

नचैवं प्रतियोगग ग्रह दशायामेवतत्प्रत्यक्षं दुर्वारं प्रतियोगिनउपल
छियनइतिव्युत्पत्यातस्याएव दोषत्वादितिभावः नचेति मानमि
तिपरेण त्वपः योपदि येति योपजातिसमानाधिकरणो मार्यत्वतिध
निर्धर्मकाविता मीवछिन्नप्रतियोगिताकाभाववा नत्वपर्यवसेनेन स्वरूपासिद्धिः दिसि ऊ सा नैवा
घनं वा ज्ञात्युपादानातगुरुधर्मप्रतियोगितानवछेदकत्वेतदवछिन्ना स
भावाप्रसिद्ध्यानव्यभिचारः नच सत्वगुणत्वाद्यवछिन्नाभावमा
दाय स्वरूपासिद्धिवार कस्योभयापत्तिपदस्यवैयर्थ्यं व्य व्यव्य राम

राम

१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्र संयोगतत्सामान्याभावयोः समावेशादिति भावः ननु एवं द्वे
संयोगसामान्याभावस्य कुतो नाव्याप्तिः [illegible]त आह तत्र चे
तितत्र संयोगसामान्याभावे सत्त्वादित्यस्य प्रतियोगिना संबंधेनेत्यादिः तत्
त्याच संयोगसामान्याभावस्यायोग्यप्रतियोगिकत्वान्नाव्याप्तिरिति
ननु प्रतियोगितावच्छेदकविशिष्टस्यैव योग्यत्वमत्यंताभावग्रहे तंत्रमन्यथा त्वं
घटोपि संयोगसामान्याभावस्य तादृशप्रत्यक्षता न स्यादत आह परि
नद्धेति परित्तः सर्वावयवावच्छेदेन प्रतियोगिग्रहात्मका दोषादेरित्यर्थः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यद्यपि एवं विभाजकजातिकथनेन कपिसंयोगत्वस्य वारणं जायते जातिपदं
व्यर्थं इति तथापि जातिपदमत्र स्वरूपकथनपरम् २

सि. ल.
६

स्याभावस्य वृत्तेः सत्त्वात् तत्र च निरवच्छिन्नवृत्तिकत्वविशिष्टस्य तदीयप्रावद्विशेषाभाव ९
स्यासत्त्वादिदोषापत्तेः साध्यव्यापकत्वमेवेति वाच्यम् गुरुत्वविभाजकजातेरेव हेतुसाध्य
योः प्रवेशात् पक्षे कावच्छेदेनेत्यस्य पदस्येतरानवच्छेदकानवच्छिन्नवृत्तिकत्वविशि
ष्टेत्यर्थमात्रसाचिंत्यम् व्याप्यवृत्तिरूपादीनां विशेषाभावस्यावृत्तिच्छेदकाप्रसिध्या तद
नवच्छेदकसाध्यसंभवेन तत्रैव साध्याव्यापकत्वतादवस्थ्यादिति भावः पक्ष त्वाविना
कृतमनुगतानुमानमात्रं क्वचिन्निषेधति एतेनेति वक्ष्यमाणदोषेणेत्यर्थः व्यर्थनिसंयो
गसामान्याभावस्य त्वन्मते केवलान्वयित्वात् साध्यतापामभावत्वादित्यप्येवसम्य
क्त्वादिति भावः अप्यात्त्वभावत्वादिकमेव तर्हि हेतुरस्त्वत आह अप्रयोजकत्वादिति ननु निरु

नापि लभवत्रगको न कमतत्त्स्या
इति गुरुत्वादिरिति॥

राम
१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्यापकतापर्याप्तौ व्याप्यवृत्तित्वस्य नसंयोगस्याभावादिति भावः प्राचां तु मते यत्तद्धर्म
योरननुगमादाह एकावच्छेदेनेति इदमुपाधेः साधनाव्यापकत्वरक्षायै नचैवं तत्र
संयोगाभावस्य गुणेऽव्याप्यवृत्तित्वादेकावच्छिन्नत्वेन साध्यव्यापकत्वं दुर्घटमिति वा
च्यम् एकावच्छेदेनेत्यनेन निरवच्छिन्नवृत्तित्वविशिष्टस्यैव विवक्षितत्वात् नच
तथापि कपिसंयोगादिसामान्याभाववति वृक्षे निरवच्छिन्नवृत्तिकत्वविशिष्टस्य यावद्
द्विशेषाभावस्यासत्त्वादुपाधेः साध्याव्यापकत्वमिति वाच्यम् जात्यवच्छिन्नाभावस्यैवो
पा क्तव्याप्तौ साध्यविधया प्रवेशात् कपिसंयोगाभावस्य चातथात्वेन तं प्रति तदीययावद्वि
शेषाभावाप्रसिद्धौ तद्रूपेण व्यापकत्वेऽपि तदभावात् नचाभिघातादिविशेषसंयोगसामा 10

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वस्मूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य च तद्वृत्तिसंयोगत्वादिवद्व्यान्यासम
वेतत्वाद्यवच्छिन्नाभावस्य यावदंतर्गतस्य वृक्षादेः स्वरूपासिद्धत्वादनुपा
देयः संयोगयावच्छिन्नाभाव इति न च सर्वावयवावच्छेदेन वृक्षादेर्गगनादे
देरेक एव संयोगो [illegible] लाघवादिति तस्यैवाभाव
वत्वं पक्षे स्वरूपासिद्धमिति वाच्यं अतिप्रसंगभंगापत्त्या शाखादितत्तदवय
वावच्छिन्नवृत्तिकसंयोगप्रतितत्तदवयवत्वेन हेतुत्वस्या

साखा[illegible]देन वृत्तिः संयोगः मूले उत्पन्नः मूलावच्छेदे
नेद्वृत्तिसंयोगः शाखोपाग्रुत्पन्नः इत्याकारकातिप्रसंगना
शाय २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गगनवृत्तिध्वंसे व्यभिचारवारणाय प्रतियोगिमत्वे सतीति घटवृत्तिरूपे व्यभिचारवारणाय विशेषगुणान्तरासमानाधिकरणत्वमिति
द्विकालवृत्ति द्वित्वे व्यभिचारवारणाय बहिरिन्द्रियग्राह्यत्वमिति अत्र पक्षपदे हृत्पदे स्वहृत्पत्तिद्विवारणाय विशेषणमिति पुनः शब्दत्व जातिद्विवारण पक्षान्तरमिति ॥२

भिचारवारकस्यैवासिद्धिवारकस्य विशेषणस्यापि सार्थकतायाः पक्षधरमिश्रा

दिसंमतत्वात् तन्न एवं शब्दो नित्यः सामान्यवत्वे सति विशेषगुणान्तरासमानाधिक 12

रणवद्बहिरिंद्रियग्राह्यत्वादित्यत्र हेतावसिद्धिवारकस्य शब्देतरार्थकस्य विशे

षणगुणान्तरपदस्य शब्दमन्यालोके तैः सार्थकत्वं समर्थितं यद्वा यो यद्धर्मिन्यून

वृत्तिधर्मावच्छिन्नयावदभाववान् स तद्धर्मावच्छिन्नाभाववानित्यपर्याप्तसंयोग

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि·ल· योघटीपयत्संबंधवान् सनत्संबंधेनतत्र नितिध्याप्याकुंडादिसंयोगिनोवदए
११ दे: संयोगेनकुंडादिमत्त्वापत्तेरित्युक्ताव्वाहएवमिति घटवत्त्वपिकपाले
घटनाशदशायोमिदानीतत्रपुनघट इतिप्रतीत्यातत्त्वच्छेदेएतत्कालेनघटाभा
वेतथाघटवत्त्वपिकपाले घटनाशदशायामिदानीकपालेनघट इत्यनभ
वात्तत्कालावच्छेदेनकपालेघटस्यसामान्याभावः सिध्यति नचेदानी
तत्रपुनघटइत्यादिप्रतीतेरेतत्कालावच्छिन्नतत्रैवघटाभावोविषयोन
तुतत्त्ववच्छेदेनैतत्कालेतथेतिवाच्यम् तत्रपुघटाभावस्यव्याप्यवृत्तितयैव
तत्कालस्यतदवच्छेदकत्वात्ग्राहकेप्रतीतेभ्रमत्वापातात् नचतथाप्येतत्काल

वृत्तिघटाभावा एव तत्र
भासतां तत्रेति वाच्यम्

राम
११

सत्येप्रलय एव व्याहन्येत इति भावः नन्वमहाप्रलये मानाभावः तदवच्छेदेनेत्य 14
युक्तं मतन्व्याहतत्वेति ननूक्तप्रतीतिः पर्वतवृत्तिहुताशनावच्छेदकत्वाभावं वि
षयीकरोति शिखरे शिखरएवछिन्नपर्वतवृत्तिहुताशनावच्छेदकत्वाभावंशि
खरे शिखरएवाछिन्नपर्वतवृत्तित्वाभावं हुताशनेऽव्याहते नतु पर्वते एव
हुताशनाभावमितियदि स्वरूपात्तदाव्यवृत्तेरिति वृत्तेः संबंधस्य वृत्तिमत्वस्वत
संबंधवत्वः तथाच्चमोपदवच्छेदेनयत्संबंधाभाववान् यत्तदवच्छेदेन तत्संबं
धावच्छिन्नाभाववान् इति व्याख्यापि शिखराववच्छेदेन संयोगावच्छिन्नवन्ह्य
भाववति वह्निरिति भावः ननूक्तव्याप्तावप्रयोजकत्वमन्यथानुपपत्त्यापेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि॰ल॰ त्तिः साध्यनवत्तिस्पंदादौ समवायेन सत्ताभाववृत्त्यापि कालिकसंबंधेन वृत्तेः ।
१२ नन्वभावे हेत्वपि कारणवृत्तित्वस्य विशेषणतया विवक्षणान्नोक्तदोषस्तथा
सत्यपि द्रव्यत्वशून्यं सत्वादित्यन्नातिव्याप्तेः द्रव्यत्वरूपसाध्याभावस्य विशे
षणतया वृत्तित्वविरहात् द्रव्यभिन्नत्वप्रकारकप्रमाविशेषणतया वृत्तित्ववि
रहात् द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्यत्वानतिरिक्तत्वा
त् नन्वभावत्वप्रतीतिः प्रमात्वस्तार्यमभावाभावस्यातिरिक्ततयोक्ता ति ।
व्याप्तिवारणायेति वाच्यम् अभावत्वं चेत्यपि भिन्नसंबंधेन भावाभावे स्वरूपसं
बंधेन साध्ये गगनादिहेतौ दव्यासेस्तथा [illegible] विशेषणतया गगन
विशिष्टस्य घटत्वाद्यभावस्यैव तादृशघटत्वाभावाभावाभावत्वकल्पनात् राम
तावतैवाभावाभावत्वप्रतीतेः प्रमात्वसंभवात् अत एव साध्यताघटकसंबंधे
१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कालस्यप्रतियोगिकुक्षावग्रहेपितादृशप्रतीतेस्तत्त्ववच्छेदेनसमयेघटाभावावगाहि
त्वस्यानुभविकत्वादितिभावः तथाचेतिगुणवत्संयोगावच्छिन्नद्रव्यत्वावच्छिन्नाभा(
न्नधूमात्समयोघटवानेतत्कालत्वात् कपालेघटवत्पटध्वंसादित्यादिके(
अव्याप्तिवारणायेत्यर्थइति असमानाधिकरणेतद्वन्मित्यर्थः नोपादेयं
चइति येनसंबंधेनयद्व्याप्यवृत्ति तेनसंबंधेनतस्यसाध्यतायांनोपादेयमि(
त्यर्थः तेनसमवायेनव्याप्यवृत्तेरपिद्रव्यत्वादेः कालिकेनसाध्यतायान्तदुपा
देयमेव अव्याप्यवृत्तिसाध्यकेसंयोगाभाववान्गुणत्वादित्यादौकाचि(
न्नदेयम् व्याप्यवृत्तिसाध्यकेत्वयोपादेयंनविरहात् सर्वत्रैवनदेयमित्यावेदयि
तुंसर्वपीवेत्युक्तम् साध्यभेदेनेति साध्यताघटकसंबंधादेरप्युपलक्षक
म् यद्यपिव्याप्यवृत्तिसाध्यकस्थलेतदप्रवेशेसत्तावान्जातेरित्यादावव्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि.ल. वच्छिन्नप्रतियोगित्वाभावरूपं गंधवत्त्वे नाभिप्रेतं तादृशसाध्यकं च समवाया
१३ दिनात्मत्वादेः साध्यत्वे तेनानवत्वादिकं समवायेनात्मत्ववति समवायाव
च्छिन्नात्मत्वाभावस्य केनापि संबंधेनावृत्तेः ल्लक्ष्याञ्च तादृशसाध्यक एव।
नोपादेयम् सत्तावान् जातेरित्यादौ पुनरूपादेयमेव सत्त्ववति स्पंदादौ।
समवायावच्छिन्नसत्ताद्यभावस्यापि कालिकादिसंबंधेन वर्तमानतया
सत्त्वादेर्निरुक्तव्याप्यवृत्तित्वात् व्याप्यवृत्तिताघटकस्य स्वाधिकरणा
वृत्तित्वस्य संबंधसामान्येन प्रविष्टत्वात् एतल्लाभार्थमेव सर्वथैव व्या
वृत्तित्वेत्युक्तं — । — संबंधविशेषानियंत्रितत्वात् व्यभिचारादिसं राम

१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नसाध्यवत्त्वावच्छेदे विशिष्टविषयताप्रतिबंधकतावच्छेदको यः संबंधस्तेन हेतुसा
मानाधिकरण्याप्रसिद्ध्या प्रागुक्तगगनत्वादिहेतौ दुष्टत्वाभाववज्जातित्वा
दित्यादौ चाव्याप्तेस्तथापि साध्यतावच्छेदकसंबंधेन प्रतियोगिमत्त्वबुद्धे
र्विषयतायाः प्रतिबंधकतावच्छेदको यः संबंधस्तेन हेत्वधिकरणवृत्तिमभाव
स्य विवक्षितमित्यदोषः तथा च दुष्टत्वाभाववज्जातित्वादित्यादौ विशेष्यता
ता विशेषेणजातित्वाभावबुद्धे विषयताविधेयप्रतिबंधकतावच्छेदको यः स्वरू
पसंबंधस्तेन जातित्वरूपाभावस्य प्रसिद्धेरिति भावः वस्तुतो व्याप्यवृत्तित्व
मत्र साध्यतावच्छेदकसंबंधेन यत्स्वाधिकरण तद्वृत्त्यभावस्य तादृशसंबंधा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि॰ल॰

२८ विशिष्टसत्वस्य व्याप्यवृत्तितया तत्साध्यकप्रतियोगिवैयधिकरण्याप्रवेशाद्भूतत्वे
त्यादिसाध्यांतरं तत्र च भूतत्वमात्मान्यत्वे सति विशेषगुणत्वं मूर्त्तत्वमवच्छिन्नपी
माणवत्त्वं तदुभयं चाव्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेन तदुभयाभावस
त्वादित्याह: नचेति वाच्यमिति परेणान्वयः तदभावो भूतत्वमूर्त्तत्वोभयाभावः स
हजत इति प्रतियोगितावच्छेदकावच्छिन्नस्याप्रवेशादित्यर्थः ननु उभयत्वस्यावि
शिष्टत्वातिरिक्तत्वेपि सहजतं प्रतियोगिव्यधिकरणस्य विशिष्टत्वावच्छिन्नाभाव
स्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टाभावस्योभयत्वा
वच्छिन्नाभावानतिरेकादत आह नचेति तदवच्छिन्नाभावादिति उभयत्वाव

छिन्नाभावप्रतियोगितां

17

राम
१४

वंयेन नवतिनियामकः तेनात्मत्वादेरपि न व्याप्यवृत्तित्वहानिरिति येतु
म एकधर्मावच्छिन्नप्रतियोगितायां प्रतियोगिताव्यक्तीनां भेदेऽप्यैक्यमिति तन्न
व्यमते वह्निमान् धूमादित्यादौ वह्न्यादिसामान्याभावभावादपि व्याप्यसंभवादिति व्याप्ति
वारणे वप्रयोजनकमाह तेनेति नच वह्निविशिष्टसत्वस्यैक्य ष्यैव तितपा तत्तत्सा
ध्यके प्रतियोगित्वेऽपि अधिकरणप्रवेशपादिदमयुक्तमिति वाच्यम् जातौ विशिष्टसंबंध
मिच्छाजातदशायामपि विशिष्टसत्वधर्मिकजातिमत्त्विष्ठप्रतियोगिव्यधिकरणाभा
वप्रतियोगित्वज्ञाना[illegible]शिष्टसत्वसाध्यकानुमितिप्रसंगस्यैव प्रकृतेतिप्रसंगाप
दार्थत्वाद्विशिष्टसत्वस्याप्रयुक्तत्वमते तत्राव्याप्तिव्याप्यसंभवादाह मूत्तत्वेति मां चस्तु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथात्वेपीति उभयत्वाश्रयवृत्तित्वस्य मननाशित्वेपीत्यर्थः तथ्याच हेतुतावच्छेदका
वच्छिन्नहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नवत्तास्थलेऽव्या
प्तिरतो नैतल्लक्षणमिति भावः वृत्तिमतिव्याप्याभावस्य व्यभिचारानिपतत्वा
व्यभिचाराभोह अत्रेति अत्र वृत्तित्वाश्रयेमनाति ननु वह्न्यादिभेदमादायाव्या
प्तेः प्रतियो। यत्समानाधिकरण दाने नैव वारणादत्यंतपदं व्यर्थमत आह अ
त्यंतपदं चेति अत्यंताभावभावत्वनिरूपकं प्रतियोगित्वं तदाश्रयत्वे वाधि
करणवृविवक्षायाः फलमाह अन्यथेति तद्भेदस्य समानाधिकरणाभावांत
रभेदस्यस्वरूपानतिरिक्ततयेति अनवस्थाभयेनेत्यादि दुर्लभत्वापत्तेरिति
हेतुसमानाधिकरणाभावमात्रैस्यैव स्वात्मकभेदप्रतियोगिपदमावांतरं
तत्समानाधिकरणत्वादितिभावः अग्रे विवक्षणीयस्य साध्यतावच्छेदकसंबं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽनतिरिक्त इत्यंशेतु प्रत्यक्षेघोभयाभावस्य विशिष्टाभावातिरिक्तत्वेपि प्रकृते भूत
त्वमूर्त्तविशिष्ट मूर्त्तत्वाभावस्यैव तद्धुमपक्षावच्छिन्नप्रतियोगिताकत्वं सम
नियताभावयोर्... वादिति वाच्यम् तावतापि हेतुमन्निष्ठाभावप्रतियोगिता
आपानधिकरणत्वं तादृशप्रतियोगितावच्छेदकत्वस्य भूतत्वमूर्त्तत्वोभय
त्वेऽनपायादिति व्याप्तिता दवस्थ्यादितिभावः उभयत्वस्येति प्रत्यद्यास्ति जत्वा
दितिपरेण त्वपेतस्याच विशिष्टयोर्द्वयसमानाधिकरणयोरप्युभयत्व
मतिरिक्तमेव विरुद्धस्थलीयमतीतः समानाकारकत्वात् भूतत्वमूर्त्त
योर्दिरूपत्वमत्र मदशापोभयुभयत्व प्रत्ययाच्छेतिभावः तात्र भूतत्वमू
र्तत्वोभयवान् इत्यत्र व्याप्तिरेवेति तथ्याच तस्य लक्ष्यतया वारणासंभवोनुचि
तइतिभावः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लि. ल.
१६

प्रतियोगितासमानाधिकरणात्यन्ताभावसाध्यकाव्याप्तितादवस्थ्यं यादृशप्रतियो
गितावच्छेदकविशिष्टस्यानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितावच्छेदक
त्वप्रवेशेतु स्पर्शमेवात्यंतदमितिध्येयम् गोध्वंसवत्त्वेनेति गवात्यंताभावस्य 23
गोध्वंसविरोधित्वादित्याशयः नच दैशिकविशेषणतया गोध्वंसस्याधिक
रणं तत्रैव गवात्यंताभावस्याविरोधात् कालिकसंबंधेन गोध्वंसवत्त्वपि प्रल
ये तदत्यंताभावसत्त्वेवाधकाभावात् नातिव्याप्तिरिति वाच्यम् प्राचांमते मह
तलादिदेशस्येव कालस्यापि दैशिकविशेषणतया ध्वंसवत्त्वात् अतएव तत्त्व
कुसंयुक्तकाले विशेषणतयावायुस्पर्शनाशस्यग्रहः शब्दादिति प्रतायांसिद्धे
रुक्तापपत्त्येवमपि नातिव्याप्तिसंभवः कालिकसंबंधेनावच्छिन्नगवात्यंता

राम
१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

येनप्रतियोग्यसमानाधिकरणस्य वह्निमान्धूमादित्यादौ घटाद्यभावे सत्वान्नस

र्वत्राप्रसिद्धिः किंतु स्वरूपसंबंधेनाभावस्य साध्यतायामेवेति स्वच्चप्रतियोग्यसिद्धि 24

मपहाय पद्धुल्लमत्वमुक्तं अत्यंताभावत्वनिरूपकप्रतियोगितावच्छेदकविवक्षा

याः फलमाह सर्वेषामेवेति भावभेदस्यातिरिक्तताऽस्वीकारादाह अभावसा

ध्यकेति तथा च घटभिन्नं पटत्वादित्यादौ घटत्वसमानाधिकरणस्य निरुक्त

प्रतियोगिव्यधिकरणगोत्वाद्यभावस्य घटभेदभिन्नत्वात् तादृशाभेदत्वंच गो

त्वाभावस्वरूपत्वात् तत्प्रतियोगितावच्छेदकमेव घटभेदत्वमित्यव्याप्तिरितिभा

वः संप्रदायरहस्यस्य सत्ता बीजं तु उक्तविवक्षायामपि सर्वेषां हेतुसमानाधिकरण

त्यंताभावानां सत्यंताभावत्वरूपकेण पूर्वदत्तणादि दतिदिशिष्टत्वावात्मकेण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि·ल·

१७ साध्यतावच्छेदकसंबंधावच्छिन्नस्यैव हेतुसमानाधिकरणाभावप्रतियोगित्वस्य
लक्षणे प्रवेशनीयत्वात् तस्य च ध्वंसप्रतियोगितासाधारण्यादिति भावः पदार्थसं
दस्तिगोत्वावच्छिन्ननाशानंतरं स्पंदसत्त्वात् घ्राणकपर्यंतानुधानं स्पंदवत्तित्वं
मलयसंगीतरीयघ्राणकप्रागभाववत्त्वेनाव घ्राणकत्वावच्छिन्नध्वंसविरहादिति
व्याप्तिः ननु मतामलये पूर्वततीयक्षणे घ्राणकत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः
तदानीमपि चरमघ्राणकनाशानुगुणस्य परमाणुस्पंदस्य सत्त्वात् तत्कालोत्पन्नपर
माणावंतरसंयोगेन मलयपूर्वक्षण एव पश्चात्तस्य विनाश्यत्वात् तादृशपरमाणावंतर
संयोगस्य कार्यद्रव्येण सहैव नाशस्वीकारान्नोनित्यसाश्रयनाशादेव तन्नाशसंभवादि
त्यत आह पदार्थपदमिति केचित्तु स्वमते घ्राणकस्यास्पंदस्य च वस्त्रमलये वृत्तौ कलवन्तरप्र राम
१७

25

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावस्यैव प्रलये कालिकसंबंधेन वर्तमानत्वात् ध्वंसादिमति दैशिकसंबंधेनैवात्यंताभा
वस्यानुगमात् तथापि प्रतियोगिवैयधिकरण्याघटितस्य व्याप्यवृत्तिसाध्यकस्थली
यलक्षणस्यावश्यं दैशिकविशेषणतया हेतुसामानाधिकरण्यघटितत्वात्तस्यैव दा[illegible]ति
व्याप्तिवैध्या नच कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य दैशिकसंबंधेन हेतुमन्निष्ठात्यं
ताभावस्यात्र सिद्ध्या तथापि नातिव्याप्तिः तिनाच्यं स घि कालवृत्तित्वादिविशिष्टघटोत्वाद्य
त्यंताभावस्यैव तादृशस्य प्रसिद्धत्वादिति भावः मिश्रमतं निरसितुमाह संसर्गाभावइतिअ
त्यंताभावपदेनेत्यादिः तथा च प्रलये गोत्वावच्छिन्नध्वंसत्वादेव नातिव्याप्तिरिति नच
गोध्वंसस्य गोत्वावच्छिन्नप्रतियोगिताकत्वस्याकारेपि साध्यतावच्छेदककालिकविशे
षणतावच्छिन्नप्रतियोगिताकत्वविरहात् कृतलक्षणस्यापाति व्याप्तिर्व्युदासः इति वाच्यं

१८ नवतित्वमेवेत्यत आह न चेति ध्वंसप्रतियोगितायां गोत्वादिधर्मावच्छिन्नत्वे मानाभावात् कै
-श्चाद्युत्पादिप्रतीतेर्गौः प्रतियोगिकध्वंसाद्यवगाहित्वं पाप्युपपत्तेर्बाधनिश्चयादिप्रतिबं
धकत्वाद्यनुरोधेनैव भेदात्यंताभावयोर्गोत्वाद्यवच्छिन्नप्रतियोगिताकत्वोपगमान्नचैव
वं तज्ज्ञोत्वाद्यवच्छिन्नत्वात् वादिबुद्धिं प्रति तज्ज्ञोत्वाद्यवच्छिन्नप्रतियोगिताकाभाववत्तानि
र्णयेन विरोधितया तद्भेदात्यंताभावस्येव तज्ज्ञो ध्वंसस्यापि तज्ज्ञोत्वावच्छिन्नप्रतियोगि
ताकत्वमावश्यकमिति वाच्यम् एकसंबंधेन तद्भेदात्यंताभावग्रहे संबंधांतरेण तज्ज्ञोमात्र
बुद्ध्युदयात् संबंधविशेषमंतर्भाव्य वात्यंताभावग्रहस्य प्रतिबंधकता ध्वंसवत्ताग्रहस्याधा
रत्वासंभवादित्याशयेनाह यत्तेषीति तेषदि चत्तत्संबंधातिरिक्तसंबंधानवच्छिन्नत्वप्र
तियोगिताकतादृशाभाववत्तानिश्चयत्वेन ध्वंसप्रागभावबुद्धिसाधारण्येण स्वेणप्रतिबंध ाय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मात्रमभावापदादृष्टमित्यप्रमाणमित्याहुः तच्चिंत्यं नित्यज्ञानमादाय सद्धेतुना वारणमपजन्य
मिति नित्यसुखोभिव्यक्तेर्नित्यत्वमते सद्धेतुत्वमाशंक्य साध्यांतरमाह दुःखंचेति ननु कार्य
मात्रं प्रति अदृष्टस्य कारणत्वात्तस्य प्राक् दुःखोत्पत्तिस्थलत्वं तस्यावतदानीमेव दुःख 28
त्वावच्छिन्नध्वंसस्यत्वान्नातिव्याप्तिः दुःखादेः स्वसमानकालीनाश्यतथा तदानीमसंभ
वात् किंच यावद्दुःखानां प्रागभावानुगमे ब्रह्मांडांतरवर्तिदुःखमादाय सद्धेतुरेवाप्यसत्
आह पदार्थस्येति अत्र तदीयदुःखप्रागभावादिसमये तदीयज्ञानविरहाद्व्यभिचारः स्फुट एव व्या
पकत्वादेरिति ध्वंसप्रत्यये केषांचित् केषांचित् प्रागभावस्य ध्वंसस्य च सत्त्वात् व्यापकत्व
स्य प्रतियोगितातिरिक्तवृत्तित्वेनानवच्छेदकत्वादित्यर्थः ननु व्यापकत्वावच्छिन्नानाधिकरण
कालवृत्तित्वविशिष्टस्यैव तद्ध्वंसस्य प्रतियोगितावच्छेदकं व्यापकत्वं अवच्छेदकत्वेनास्तु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सि. ल.
१८ चानुभवरूपं देशाद्यवच्छेदकालवृत्तितावच्छेदकाभिमानमन्यथा गृहे नेदानीं गौरित्यादिप्रत्ययबला
त् गृहादिदेशाद्यवच्छिन्नत्वं ताभावत्वनापत्तेः कालानवच्छेदकः स्यात्तत्रापि गवाभावे गृहवृत्ति
त्वे तत्कालवृत्तित्वोभयावगाहित्वापत्तेः ; एवं च तत्वादितिभावः नन्वेवमपि प्रतियोगिवैय
धिकरण्यपक्षे तस्याव्यवृत्तिसाध्यकसद्धेतौ पलक्षणाद्यगोमान्गोत्वादित्यादावतिव्या
प्तिर्गवाद्यभावस्य व्याप्ते कालेप्रतियोगिसमानाधिकरणत्वपालक्षणप्रवेशात्वादाह
तच्छून्ये इति गवादिशून्ये चेत्यर्थः तथा च प्रतिकिंचित्समैत्वाधिकरणावच्छेदेन प्रतियोगिवै २९

यधिकरण्यं पदद्वये वाच्यम् तस्य गवाद्यभावेऽपि सत्त्वान्न तत्रापि लक्षणे तिव्याप्तिरिति भावः
नचेति वाच्यमिति पदेनान्वयः संसर्गाभावविशेषणमिति सदातन संसर्गाभाव इत्यर्थः संसर्गेति
त्वं प्रतियोगितावच्छेदकसंसर्गेण यः प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयोऽभावस्तत्त्वमि
त्यर्थः संसर्गपदत्तादात्म्यनिरासार्थमाह तेन भेदव्युदासः ध्वंसप्रागभावयोरप्युत्तरकालपूर्व
कालावेव प्रतियोगितावच्छेदकसंसर्गस्याविति ताभ्यामेव संबंधाभ्यां प्रतियोग्यारोपः प्राग
भावध्वंसयोः प्रत्यक्षे हेतुरतस्तयोर्नाव्याप्तिरिति साचामाशयः पठितमिति तथा च चक्र राम
कादिसंसर्ग इति भावः न च अन्यत्वे पर्यंतस्यैतसाध्यसंबंधितावच्छेदकरूपवत्त्वादित्वरूप १८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कत्वं तदापि तन्नाशक्षणावच्छिन्नत्वस्यैकालिकत्वेन सामंजस्येतरयोः प्रतियोगितायां सामान्यधर्मावच्छि
न्नत्वे मानाभावात् ननु प्रतियोगिमतः देवतत्वप्रतियोगिकं तत्राप्यत्यंताभावानुपगमादत आह अ
व्यापैतीति तस्यैति गवात्यंताभावस्येत्यर्थः तेन गगनादिभावस्य गोविशिष्टगोत्वाद्यभावस्य वा
प्रलयवृत्तित्वेपि न क्षतिः कालमात्रेति अत्र गवात्यंताभावस्य देशिकविशेषणतया कालमा
त्रवृत्तित्वे प्रांचैरुक्तं सदा तन्नत्वव्यवहारस्य कालिकविशेषणतयोर्वसंभवादिति नु विभावनी
यं ननु प्रतियोगिविशिष्टेपि काले तदत्यंताभावसत्वे गवावच्छेदेनेदानीं गोत्वं नास्तीति प्रती
तिः कथं तत्राह इमांस्त्विति एकस्य प्रतियोगिमतः कालस्य देशाभेदः प्रतियोग्यना
धारदेशः तथात्वं अत्यंताभावत्वं अपरस्येति ध्वंसादिमतः कालस्येत्यर्थः स्वरूपावच्छि
न्नामितीति रवच्छिन्नमित्यर्थः तथात्वमिति निरूपैकदेशान्वयः नास्तीदानीमश्वेन गोत्वमित्यादिप्र
तीतिः कालवृत्तितयाऽश्ववृत्तित्वाच्च गोत्वाभावावगाहितयोपपत्तौ देशस्य कालेवृत्ति
तावच्छेदकत्वे मानाभाव इत्यत आह देशा इति दवार्थः साक्षात्प्रतीत्यनुभूयमानत्वेन तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२२ कारणत्वमिति तन्नव्यानामाशयः । वस्तुतस्तु मात्रस्यैव दिगुपाधित्वमतो दिग्वृत्तितापाम
वच्छेदकत्वं न त्वापि कारणत्वमिति प्राचां मते संबंधसामान्ये नैव तस्य विशेषणतान पि 31
कारणत्वात्मनोऽन्यपदमिति तत्त्वं दं । एवमप्यवच्छेदकता संबंधेनैव मनसो विशेषण
तापत्तेः संबंधेन मनोन्यपदवैयर्थ्यापत्तेः मतन्वत्तादृशाद्रव्यत्वाधिकरणोपदापे
क्षतीति तत्र तद्यत्वाभाव एव संबंधसामान्ये न प्रतियोगिव्यधिकरण इति प्येपम ननु
मते दिक्कालयोरीश्वरानतिरिक्तत्वादत्र व्याप्तिरवैतन्यस्य ह जातीति न वजाते व्यप्यच
तित्वपातत्तत्साध्यकप्रतियोगितयोमिवैयधिकरण्य प्रवेशादेवनातिव्याप्तिरितिवाच्यं सम
वायेनाव्यापकत्वग्रहदशायामपि संबंधसामान्ये न प्रतियोगिवैयधिकरण्यघटितव्याप
कत्वज्ञानानात्समवायेनानुमित्यापत्तेरेव मत्ते व्याप्तिपदार्थत्वाज्ञानत्वादेरपि साध्यक्या
प्यवृत्तित्वविर साध्ये प्रतिव्याप्तिर्मो मपाति साध्यघटत्वेति —— रामः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यधर्मि[illegible]भेद इति भितेन । अव्याप्यत्वादिभेदरूपस्य घटत्वात्यंताभावस्य पटनि
ष्टप्रतियोगितापा भेवतादात्म्यसंबंधावच्छिन्नत्वादव्याप्तिविरहोदितिध्येयं ननु वि
षयतापाददपानियामकत्वमते ज्ञानाभावस्य[illegible]नादौ सहजत एव प्रतियोगिव्य 32
धिकरणत्वाभावात्तिव्याप्तिरत आह विशेषणतयेति अत्र व्यभिचार निरूपकः कालो
दिकं च तत्र च कालिकादिकेन दिशि च देशिकेन संबंधेन विशेषणतया तदभा
वो न प्रतियोगिव्यधिकरण इति भवत्यतिव्याप्तिः विशेषपदं व्यभिचारत्वरक्षापेक्ष
व्यत्वादित्युक्तासंबंधसामान्येन विशेषणतयस्य भननाति असत्त्वान्नातिव्याप्तिसंभवः का
लोपाधित्ववद्दिगुपाधित्वस्यापि मनस्यसत्त्वादव्यावर्तकत्वादव्याप्तमनसः कालो
पाधित्वमपि स्यादत नत्वं मनोन्यौतिमूर्जस्यैव दिगुपाधित्वं दिक्कृतविशेषणतयापि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पत्नभेदत्वादिवत्तत्संसर्गाभाववत्त्वेन प्रमाद्वंद्वोपाधिरिति तन्न गुरुत्वं भेदत्वादिवदवच्छेदस्य संसर्गाभा
वत्वस्यानुभवेनाविषयीकरणात् तादृशिकस्यैव तादृश्यभेदाभिन्नाभाववत्त्वादिनाप्युप
पत्तेः वस्तुगतिमनुरुध्याह अनुपदमिति विवेचयिष्यते इति तदपि वानार्थो दपणिता 33
दिग्रंथेनेतिशेषः साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यघटितलक्षण
मभिप्रेत्याह प्रयोजनाविरहादिति धूमादिसमानाधिकरणस्य वन्ह्यादिभेदस्य प्रतियोगि
समानाधिकरणत्वादेव तस्मादापाव्याप्तिविरहादिति भावः व्याप्यवृत्तिसाध्यकस्थलीयल
क्षणस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटितत्वात् तदभिप्रेत्याह अव्या
प्तिश्चेति तादात्म्येन गवादेः साध्यतायां तत्संबंधावच्छिन्नात्यंताभावाप्रसिद्ध्या साध्याभाववत्त्वा
दावव्याप्तिरित्यर्थः इदमव्यभाववृत्तिभावेनाधिकरणस्य स्वरूपोनवाधर्मीत्यंताभा ल

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्येत्यर्थः इति॥ केचित्तु वह्न्यनुयोगिनियमानां तत्तत्संसर्गघटितनियमत्वस्य संसर्गत्वं च
विशिष्टबुद्धिजनकत्वं च नियमघटितं भिन्नभेदं संसर्गत्वम् स्येति नियमप्रवेशोऽपी
ति भावः अतः संसर्गाभावत्वेन ज्ञापितं तद्दर्भाद् इति तत्स्यैव निवेशादिति भावः प्राकु
रित्यस्य संसर्गकाव्याप्ति वदंस्तत्रेदमिति ननु अभाव वृत्तौ प्रतियोग्यारोपस्य हेतुत्वे माना
भावात् उक्त संसर्गाभावत्व घटितव्याप्तिलक्षणस्यासंभवः कथंचिदभावलौकिकप्रत्य
क्षं प्रत्यारोपस्य हेतुताक्षीकारेऽपि तद्विपक्षाद्यके व्यभिचारिण्येति व्याप्ति तत्रसमा
नाधिकरणसाध्याभावस्याप्रतिपत्तयानिरुक्तसंसर्गाभावत्वाविरहात् अतस्ता
ह वदंस्तत्रेदमिति भेदभिन्नाभावत्वं संसर्गाभावत्वं तदा तत्तत्त्वविशिष्टं चात्यन्ताभा
वत्वं तु संसर्गविषयतातादात्म्यावच्छिन्नप्रतियोगिताकत्वमनुयोगितावशेषावे 34

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ति॰ल॰

22 तादात्म्यसंबंधेन प्रतियोगिसंबंधितावच्छेदिभावस्योक्तत्वात् संयोगसामान्याभावविशिष्टाव

च्छिन्नाभावप्रतियोगितावा महानसीयसंयोगत्वादिविशिष्टानवच्छेदकतया वन्ह्यभा

वस्य पर्वतादौ महानसीयसंयोगसंबंधेन प्रतियोगितासमानाधिकरणत्वविरहेप्यभा 35

स्याभावादिति ध्येयं न च समवायावच्छिन्नवन्ह्यभाववन्महानसादौ पक्षमहानसादौ वन्ह्यादिवार

णाय पर्यवसन्ना प्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेशनीयं तथा च रूप

संयोगवन्भिन्नतादात्म्येन साध्यतायामिति हृदत्वादावव्याप्तिः भेदे साध्यत्वे च प्रति

योगितावच्छेदकतादात्म्यसंबंधेन प्रतियोगिप्रसिद्धिर्न कारणमिति चेत् न अत्राह संबंधि

चेति न च तादात्म्येन वस्तुमात्रस्यैव साध्यवृत्तित्वात्तादात्म्यसंबंधेन साध्यतायां

तियोगिवैयधिकरण्यासंभवादिति दपस्तमिति वाच्यं मूलापवच्छेदेन कापि संयो ताप

22

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विशेषणतादिकं काले विशेषणतादिकं कालविशेषणताकालीकी चैकत्वेति समवायस्या
पि स्वात्मक एव स्वरूपसंबंधरूपति तन्नापि जात्येकार्थसमवायो लक्षौ त्याशयः जातिः सत्ता
इति वत्समवायः सन्नु इति प्रतीतेः प्रतियोगितेति तथा च ज्ञानाद्यभाव स्वत्ताद्वशेन संबंधे
न यत्तद्येप्रतियोगित्वाधिकरणत्वान्नातिव्याप्तिः न च तादृशसमप्रकिंचित्संबंधेन प्रतियो
गिताभाव्याभावस्यापि प्रसिद्धत्वात्तद्वच्छेदेन प्रकृतस्तीयसंयोगेन प्रतियोग्यसमाना
धिकरणत्वात् वह्निमान् धूमादित्यादावव्याप्तिः स्वप्रतियोगितावच्छेदकसंबंधसामान्ये
न तस्यापि कोचजातिमान् जातेत्यादित्यावतिव्याप्तिः समवायेन जात्यभावस्यैव तादात्म्ये
न जातिमद्भेदत्वात्तस्य च स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन यज्जातिसंबंधित्व
तित्वेन प्रतियोगिव्यधिकरणत्वाभावादिति नाव्यं स्वप्रतियोगित्वं तादृशासंबंधावच्छिन्नं

36

सि· ल·
२३ कपिसंयोगीत्यादित्यादावव्याप्तिरत आह तद्विशिष्टस्येति प्रतियोगितासमानाधिक
रण्याभावविशिष्टस्येत्यर्थः तथाच हेतुमन्निष्ठद्रव्यत्वे संयोगवद्भिन्नाभावविशिष्टसं
योगाभावो नास्तीति नाव्याप्तिः विशिष्टनिरूपिताधेयत्वमप्यतिरिक्तमित्याशयेनेदं
पदात् विशिष्टस्येतत्पदे हेत्वधिकरणेऽन्वयः तत्र च यद्धर्मावच्छिन्नाधिकरणत्वं तेन विशिष्ट
स्याधिकरणं प्रविष्टत्वाधिकरणम् तत्र तन्निष्ठाभावेनाव्याप्तिरित्यर्थः यद्यपि प्रतियोगि
समानाधिकरणत्वं हेतुविशेषणं तेन प्रतियोगिसामानाधिकरण्यविशिष्टो हेतु
स्तदधिकरणत्वं तथाभावस्य प्रतियोगितानवच्छेदकत्वं वाच्यं तावता वृत्तसंयोगी तत्त्वादि
त्यादौ नाव्याप्तिसंभावना तदा एव प्रतियोगिवैयधिकरण्याविशिष्टा न हेत्वधिकरण
त्वाभावात् तत्रापि कपालेच संयोगाभावः

गीतावच्छेदकस्य वृत्तावौचित्यप्रसंगीकारात्तादात्म्येन कपिसंयोगवत्तोऽव्याप्यवृत्तित्वात् नचै
वं प्रतियोग्यनधिकरणे हेतुमन्निष्ठाभावेत्यादिमतेनिष्कर्षेप्यप्रतीकारः प्रतियोगि
तावच्छेदकसंबंधेन प्रतियोगिसंबंधिनत्तानच्छिन्नत्वावच्छिन्नभेदकूटविशिष्टहे
तुमद्वृत्तित्वस्यैव तत्र वक्तव्यत्वात् वस्तुतस्तादात्म्यसंबंधेनापि न कस्यचित्प्रागुक्त
व्याप्यवृत्तित्वमतो यथाश्रुतमेव सम्यक् केचित्तु प्रतियोग्यनधिकरणहेतुमन्निष्ठा
भावप्रतियोगितापर्याप्त्यवच्छिन्नपत्संबंधावच्छिन्नत्वोभयाभाववद्दत्त्यादिवत्यमा
णनिष्कर्षेप्यतादात्म्येन सत्ताधीतापाव्यभिचारित्वमिति व्याप्तिरत: प्रतियोग्यनधि
करणत्वपर्यन्तस्य प्रतियोग्यसंबंधित्वमवच्छेदं तत्रानिवेशयंतित्याशयेन संबंधित्व
मुक्तमित्याहुः ननु कपिसंयोगाभाववत्यपि गुणादौ प्रतियोग्यसमानाधिकरणत्वात्

38

त्रि·ल·
२५

39

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रतियोग्यसमानाधिकरण इत्यस्य निरूढलाक्षणिकत्वेन हेत्वसमानाधिकरणाभाववत्त्वे विशे
षणं प्रतियोग्यसमानाधिकरणेत्यदलमत एव तादृशपाठ इत्यवधेयं ननु भेदस्य व्याप्यवृ
त्तितया प्रतियोगिसमानाधिकरणभिन्नत्वोक्तौ प्रागुक्ताव्याप्तेः कारणसंभवेन विशिष्टस्येत्या
दिकं विफलमत आह तदवृत्तीति प्रतियोगिमद्वृत्तिभिन्नाभिन्नेत्यर्थः अत्रेति अस्वरूपादि
त्वेऽपि तदभाववत्त्वमिति तत्त्वाच्च संयोगिसत्त्वादित्यादावतिव्याप्तिरिति भावः ननु संयो
गाभावे गुणे न संयोगस्य सामानाधिकरण्यमिति प्रतीतिबलादेव गुणत्वावच्छेदेन संयोगा
भावे प्रतियोगिसामानाधिकरण्याभावसत्त्वान्नातिव्याप्तिरत आह प्रतीतिरिति उक्त
प्रतीतिः संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यस्यावच्छेदकत्वाभाव

40